अभ्यर्थनाभङ्गभयेन साधु-
र्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ॥”

माध्वकं, क्ली, (माध्वीक। पृषोदरादित्वादीकारस्याकारः।) माध्वीकम्। इत्यमरटीकायां भानुदीक्षितः ॥

माध्वी, स्त्री, (मधुनो विकारः। मधु+अण्। ङीप्। “सत्वन्वाख्यत्वाख्यमाध्वीति।” ६। ४। १७५। अत्र स्त्रियां यणादेशो निपात्यते।) मद्यम्। इति त्रिकाण्डशेषः ॥ मध्वादिकृता सुरा। इति राजनिर्घण्टः ॥ (यथा, मनौ। ११। ९५।
“गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।”
मधु मधुररसोऽस्त्यस्य कण्टकावच्छेदे अण्।) मधुरकण्टकमत्स्यः। इति शब्दरत्नावली ॥ (मधुमति, त्रि। यथा, ऋग्वेदे। ७। ७१। २।
“दिवानक्तं माध्वी त्रासीथां नः।”
हे माध्वी! मधुमन्तौ। इति तद्भाष्ये सायनः ॥ नदीविशेषः। यथा, मात्स्ये। १२०। ७१।
“तेभ्यः शान्ता च माध्वी च द्वे नद्यौ सम्प्रसु-यातम्।”)

माध्वीकं, क्ली, (माध्वी+स्वार्थे कन्।) मधूकपुष्पकृतमद्यम्। तत्पर्य्यायः। मध्वासवः २ माधवकः ३ मधु ४। इत्यमरः। २। १०। ४१॥ मधुमाध्वीकमित्येकं नामेति केचित्। पूर्व्वौ द्वौ पुष्पमद्ये। (यथा, महाभारते। १। २७७। ३९।
“कथं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम्।
लोभं सौवीरके कुर्य्यान्नारी काचिदिति स्मरे॥”)
परौ द्वौ द्राक्षाविकारे। इति भरतः ॥ मार्द्वीकमिति वा पाठः। इति रमानाथः। माध्वीकस्थाने माध्वकमिति भानुदीक्षितः। (मधु। यथा, नैषधे। १६। ३३।
“धयतु नलिने माध्वीकं वा न वाऽभिनवागतः।
कुसुमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः।
इह तु लिहते रात्रौ सर्व्वं रथाङ्गविहङ्गमा
मधु निजवधूवक्त्राम्भोजेऽधुनाऽधरनामकम्॥”
“माध्वीकं मकरन्दम्। इति तट्टीकायां नारायणः ॥) तत्पर्य्यायो यथा,—
“मधुमाध्वीकमाध्वीकक्षौद्रसारघ्यमीरितम्।
मक्षिकावरटीभृङ्गवातपुष्परसोद्भवम्॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

माध्वीकफलः, पुं, (माध्वीकं मधुमत् फलमस्य।) मधुनालिकेरिकः। इति राजनिर्घण्टः ॥

माध्वीमधुरा, स्त्री, (माध्वीमदत एव मधुरेति।) मधुरखर्ज्जूरिका। इति राजनिर्घण्टः ॥

मान, कि अर्च्चे। इति कविकल्पद्रुमः ॥ (चु०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि मानयति मानति। इति दुर्गादासः ॥

मान, ङ विचारे। अर्च्चे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ मीमांसते शास्त्रं धीरः। अर्च्चायां सनादयो न स्युरिति रमानाथः। इति दुर्गादासः ॥

मानं, क्ली, (मीयतेऽनेनेति। मा+करणे ल्युट्।) परिमाणम्। तत्पर्य्यायः। पौतवम् २ द्रुवयम् ३ पाय्यम् ४ पौतवम् ५। तत्तु तुलाङ्गुलिप्रस्थैस्त्रिविधं भवति। तत्र तुलाग्रहणेनोन्मानादुपलक्ष्यते। अङ्गुल्या हस्तादि। प्रस्थेन द्रोणादि। इत्यमरभरतौ।२।९।८५॥ प्रमाणम्। इति मेदिनी। ने, १५ ॥ यत्र तालो विरमति तत्। तदेव ग्रहमुच्यते। तच्चतुर्विधम्। समं विषमं अतीतं अनागतञ्च। इति सङ्गीतशास्त्रम् ॥ * ॥

अथ मानपरिभाषा।
“न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया॥
चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः।
विहाय सर्व्वमानानि मागधं मानमुच्यते॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः।
त्रसरेणुस्तु पर्य्यायनाम्ना वंशीति गद्यते॥
जालान्तरगतैः सूर्य्यकरैर्वंशी विलोक्यते।
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम्॥
षड्भिस्तु रक्तिकाभिः स्यान्माषको हेमधानकौ।
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते॥
टङ्कः स एव कथितस्तद्द्वयं कोलमुच्यते।
क्षुद्रमो वटकश्चैव द्रङ्क्षणः स निगद्यते॥
कोलद्वयन्तु कर्षः स्यात् स प्रोक्तः पाणिमानिकः।
अक्षः पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम्॥
विडालपदकञ्चैव तथा षोडशिका मता।
करमध्यो हंसपदं सुवर्णं कवलग्रहम्॥
उदुम्बरञ्च पर्य्यायैः कर्ष एव निगद्यते।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा।
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका।
प्रकुञ्चः षोडशी विल्वं पलमेवात्र कीर्त्त्यते॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते।
प्रसृतिभ्यामञ्जलिः स्यात् कुडवोऽर्द्धशरावकः॥
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः॥
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढ़कः।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलश्च सः॥
चतुर्भिराढ़कैर्द्रोणः कलशो नल्वणोर्म्मणः।
उन्मानश्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः॥
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः।
शूर्पाभ्याञ्च भवेद्द्रोणी वाहो गोणी च सा स्मृता॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः।
चतुःसहस्रपलिका षण्णवत्यधिका च सा॥
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः।
तुलापलशतं ज्ञेया सर्व्वत्रैवैष निश्चयः॥
माषटङ्काक्षविल्वानि कुडवः प्रस्थमाढ़कम्।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः॥” * ॥
मागधपरिभाषायां षड्रत्तिको माषश्चतुर्व्विंशतिरत्तिकष्टङ्कः षण्णवतिरत्तिकः कर्षः। अयं चरकसम्मतः॥ सुश्रुतमते। पञ्चरत्तिको माषो विंशतिरत्तिकष्टङ्कोऽशीतिरत्तिकः कर्षः। अयमेव कलिङ्गपरिभाषायामपि। यतस्तत्राष्टरत्तिको माषो द्वात्रिंशद्रत्तिकष्टङ्कः। सार्द्धटङ्कद्वयमितः कर्षः।
“गुञ्जादिमानमारभ्य यावत् स्यात् कुडवस्थितिः।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम्॥
प्रस्थादिमानमारभ्य द्विगुणन्तु द्रवार्द्रयोः।
मानं तथा तुलायास्तु द्विगुणं न क्वचित् स्मृतम्॥
मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम्।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत्॥”
इति मागधमानम् ॥ * ॥

अथ कालिङ्गमानम्।
“यतो मन्दाग्नयो ह्रस्वा हीनसत्त्वा नराः कलौ।
अतस्तु मात्रा तद्योग्या प्रोच्यते सुश्रुसम्मता॥
यवो द्वादशभिर्गौरैः सर्षपैः प्रोच्यते बुधैः।
यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्॥
चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च।
गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषिकः॥
चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः।
चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्व्ववन्मताः॥
स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलम्।
प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत्॥
नाल्पं हन्त्यौषधं व्याधिं यथाम्भोऽल्पं महानलम्।
अतिमात्रञ्च दोषाय यथा शस्ये बहूदकम्॥”
इति मानपरिभाषा। इति भावप्रकाशः ॥

मानः, पुं, (मन्यते बुद्ध्यतेऽनेन इति। मन+घञ्।) चित्तसमुन्नतिः। इत्यमरः। १। ७। २२॥ चित्तस्य समुन्नतिरुद्धता मानः। साङ्गे धनाद्युत्कर्षेणात्मनि चित्तोन्नतिर्मान इति। मत्समो नास्तीति मननं मानः। इति तट्टीकायां भरतः ॥ (यथा, मनौ। ४। १६३।
“द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत्॥”)
आत्मनि पूज्यताबुद्धिः। इति नीलकण्ठः ॥ अनुरक्तयोर्दम्पत्योर्भावविशेषः। यथा,—
“दम्पत्योर्भाव एकत्र सतोरप्यनुरक्तयोः।
स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते॥”
इत्युज्ज्वलनीलमणिः ॥
पूज्यत्वम्। यथा,—
“अधमाः कलिमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः।